# संस्कृत-वार्ता:

दिनाङ्क :-13.07.2024

प्रात: - 06:55

प्रधानमन्त्री-बिम्सटेक्

प्रधानमन्त्री नरेन्द्रमोदी शान्तिपूर्णाय समृद्धाय सुव्यवस्थिताय सुरक्षिताय च बिम्सटेक क्षेत्राय भारतस्य प्रतिबद्धताया: पुष्टिं कृतवान्। असौ आर्थिक-सामाजिकविकासाय प्रबलरूपेण बिम्सटेक् इत्यस्य महत्वपूर्णभूमिकामपि प्रख्यापितवान्। अवधेयं वर्तते यत् बिम्सटेकइत्यस्य सदस्यदेशानां विदेशमन्त्रिण: ह्य: प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मेलनं कृतवन्त:। अत्रावसरे प्रधानमन्त्री सम्पर्क-ऊर्जा-व्यापार-स्वास्थ्य-कृषि-विज्ञान-सुरक्षा-इत्यादिषु क्षेत्रेषु पारस्परिकं सहयोगं वर्धयितुं मन्त्रिभिस्सह सार्थकीं चर्चां कृतवान्। एतदनन्तरं प्रधानमन्त्री सितम्बरमासे आयोक्ष्यमाणाय बिम्सटेकशिखरसम्मेलनाय थाईलैंण्डदेशाय पूर्णसमर्थनमपि अभिव्यक्तवान्।

संविधानहत्यादिवस:

प्रशासनेन प्रतिवर्षं जूनमासस्य पञ्चविंशे दिनाङ्के संविधानहत्यादिवसत्वेन मानयितुं निर्णय: निर्णीत:। अस्मिन् एव दिवसे पूर्वप्रधानमन्त्रिणा इन्दिरागांधिना पञ्चसप्तत्यधिकनवदशशततमे वर्षे देशे आपत्काल: उद्घोषित: आसीत्। प्रधानमन्त्री श्रीमोदी उक्तवान् यत् अयं दिवस: तासां घटनानां स्मरणं कारयिष्यते यदा भारतस्य संविधानस्य मर्दनं जातमासीत्। गृहमन्त्री अमितशाह: एकस्मिन् सामाजिकसन्देशपटले लिखितवान् यत् अस्य निर्णयस्योद्देश्यं आपत्कालात् प्रभावितानां तेषां कोटि: जनानां भावनां सम्मानमिति अस्ति। ये लोकतन्त्रस्य पुनरुज्जीवनाय संघर्षम् अकुर्वन्। अनेन निर्णयेन च देशस्य लोकतन्त्रस्य रक्षा भविष्यति।

महाराष्ट्र-विधानपरिषत्

महाराष्ट्रविधानसभापरिषद: एकादशासनेषु ह्य: विहिते निर्वाचने भाजपेतिदलस्य नेतृत्वयुताया: संयुत्या: सर्वे नव प्रत्याशिन: विजयम् अधिगतवन्त:। महाविकास अघाडीदलस्य त्रिषु प्रत्याशिषु प्रत्याशिद्वयेन विजय: प्राप्त:। द्विवार्षिके एतस्मिन् निर्वाचने द्वादश प्रत्याशिन: रणे आसन्। आहत्य चतु: सप्तत्यधिक-द्विशतं विधायकै: एतदर्थं मतदानं कृतम्। भाजपेतिदलस्य पञ्च अजितपवारस्य एन्.सी.पी. दलस्य द्वौ शिवसेनायाश्च द्वौ प्रत्याशिनौ विजयं प्राप्तवन्त:।

नेपाल:-विश्वासमतम्

नेपालदेशस्य प्रधानमन्त्री पुष्पकमलदहलप्रचण्डः ह्यः संसदि विश्वासमतं नैवाधिगतम्। संसदि सहयोगिना नेपालस्य कम्युनिस्टपार्टीतिदलेन यूनिफाइड-मार्क्ससिस्ट-लेननिस्ट इत्यनेन तस्य प्रशासनात् समर्थनं प्रत्यावर्तितम्।

प्रधानमन्त्री – मुम्बईनगरी

प्रधानमन्त्री नरेन्द्रमोदी अद्य मुम्बय्याः गोरेगांवक्षेत्रस्य इंजीनीयरिंग-सर्विस-कम्पनी इत्यस्मिन् प्रदर्शनीकेन्द्रे चतुश्शतकोट्यधिक-नवविंशतिसहस्ररूप्यकाणां मार्ग-रेल-जलपोतस्थानक-परियोजनाः राष्ट्राय समर्पयिष्यति आधारशिलां च स्थापयिष्यति। सायं च श्रीमोदी भारतीयसमाचारसेवासचिवालये आई. एन्. एस्. इत्यस्य स्तम्भस्यापि उद्घाटनं विधास्यति।

सर्वोच्चन्यायालयः - केजरीवालः

सर्वोच्चन्यायालयेन ह्यः दिल्ल्याः मुख्यमन्त्रिणे आमआदमी पार्टीतिदलस्य राष्ट्रियसंयोजकाय अरविन्दकेजरीवालाय मद्यनीति प्रवञ्चनायाः धनशोधनप्रकरणे अल्पावधिकमुक्तियाचिका प्रदत्ता। न्यायाधीशयोः सञ्जीवखन्ना - दीपाङ्करदत्ताइत्यनयोः एकेन खण्डपीठेन प्रवर्तननिदेशालयद्वारा निगडनं विरुद्ध्य दिल्ल्याः मुख्यमन्त्रिणः याचिका उच्चखण्डपीठाय सम्प्रेषिता । अधुना श्रीकेजरीवालः न्यायिककारावासे एव स्थास्यति यतो हि केन्द्रीयान्वेषणाभिकरणेन मद्यनीतिप्रकरणे भ्रष्टाचार-निरोधक–विधेः अन्तर्गतं श्रीकेजरीवालः जूनमासस्य पञ्चविंशे दिनाङ्के निगडितः। अवधेयं वर्तते यत् प्रवर्तन निदेशालयेन मार्चमासस्य एकविंशति दिनाङ्के केजरीवालः निगडितः आसीत्।